[1]व्यतिकृन्तमानः, कर्तयमानः, — चरीकृत्यमानः;
व्यतिकर्तिष्यमाणः-व्यतिकर्त्स्यमानः, कर्तयिष्यमाणः, [2]चरीकृतिष्यमाणः ;
काष्ठकृत्-कृतौ-कृतः ; — — —
[3]कृत्तम्[A]-त्तः, कर्तितः, चिकृत्सितः-चिकर्तिषितः, चरीकृतितः-तवान् ;
[4]कृतः, [5]विकर्तनः, कर्तः, चिकृत्सुः-चिकर्तिषुः, चरीकृतः ;
कर्तितव्यम्, कर्तयितव्यम्, चिकृत्सितव्यम्-चिकर्तिषितव्यम्, चरीकृतितव्यम् ;
कर्तनीयम्, कर्तनीयम्, चिकृत्सनीयम्-चिकर्तिषणीयम्, चरीकृतनीयम् ;
[6]कृत्यम्, कर्त्यम्, चिकृत्स्यम्-चिकर्तिष्यम्, चरीकृत्यम्;
ईषत्कर्तः-दुष्कर्तः-सुकर्तः ; — — —
कृत्यमानः, कर्त्यमानः, चिकृत्स्यमानः-चिकर्तिष्यमाणः, चरीकृत्यमानः ;
कर्तः, कर्तः, चिकृत्सः-चिकर्तिषः, चरीकृतः ;
कर्तितुम्, कर्तयितुम्, चिकृत्सितुम्-चिकर्तिषितुम्, चरीकृतितुम् ;
कृतिः, कर्तना-चिकृत्सा, चिकर्तिषा- चरीकृता ;
कर्तनम्, कर्तनम्, चिकृत्सनम्-चिकर्तिषणम्, चरीकृतनम् ;
[7]कर्तित्वा, कर्तयित्वा, चिकृत्सित्वा-चिकर्तिषित्वा, चरीकृतित्वा ;
विकृत्य, विकर्त्य, विचिकृत्स्य-विचिकर्तिष्य, प्रचरीकृत्य ; —

| | | | |
|---|---|---|---|
| कर्तम् २, कर्तित्वा २, | कर्तम् २, कर्तयित्वा २, | चिकृत्सम् २, चिकृत्सित्वा २, | चिकर्तिषम् २, चिकर्तिषित्वा २, |
| | | | चरीकृतम् २; चरीकृतित्वा २. |

1. ‘कर्तरि कर्मव्यतीहारे’ (1-3-14) इति शानच्।
2. यङः, अल्लोपस्य स्थानिवद्भावात् गुणो न।
3. ‘श्वीदितो निष्ठायाम्’ (7-2-14) इति इण्णिषेधः।
4. ‘इगुपध—’ (3-1-135) इति कर्तरि कः प्रत्ययः।
5. नन्द्यादिपाठात् ‘नन्दिग्रहि—’ (3-1-134) इति कर्तरि ल्युः। विशेषेण कर्तयति भक्तानां रोगादिकमिति विकर्तनः=सूर्यः। ‘आरोग्यं भास्करादिच्छेत्—’ इति स्मरणात्।
6. ‘ऋदुपधाच्चाक्लृपि—’ (3-1-110) इति क्यप्।
7. ‘न क्त्वा सेट्’ (1-2-18) इति कित्वनिषेधात् गुणः।

A. ‘निष्कृत्तमत्तद्विपकुम्भमांसैः संपृक्तमुक्तैर्हरयोऽप्रपादैः।’ भ. का. 11-42.